
ISSN : 2229 - 5577

# सागरिका

त्रैमासिकीसंस्कृतशोधपत्रिका

अङ्कः ४६/१-२, वि.सं. २०७२(संयुक्ताङ्कः)



नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् ससुरभिं सुरभिं सुमनोभरैः॥

शिशुपालवधमहाकाव्यम्-६.२

# अनुक्रमः


अनुवादशास्त्रम् अनुवादव्यवहारश्च ९

**राधावल्लभः त्रिपाठी**

काव्यशास्त्रे सौन्दर्यम् ३३

**रामशङ्करः अवस्थी**

विद्वदुपज्ञेयमुक्तिः ५४

**एन.के. सुन्दरेश्वरन्**

पुरुषार्थचतुष्टयेऽर्थस्यावधारणा ६०

**मिश्रीलालः**

त्रैस्वर्यस्वरूपविमर्शः ६७

**रामानुज उपाध्यायः**

भारतीयनारीमानोन्नतिः ७३

**सी.एच. नागराजू**

भारते कृषकाणां कृषिसमस्या ७८

**सञ्जयकुमारः**

मैत्रायण्युपनिषदि तत्त्व-चिन्तनम् ८४

**रेनू के. शर्मा**

यमयमीसूक्ते जलविज्ञानम् ९०

**यशस्वी**

संस्कृतसाहित्ये राष्ट्रिय-भावना ९५

**रामहेतः गौतमः**

गार्हस्थ्याधारं दाम्पत्यजीवनम् १०३

**शशिकुमारसिंहः**


Scanned with CamScanner

# भारते कृषकाणां कृषिसमस्या

सञ्जयकुमारः

कृषिः एव अस्माकं देशस्य जीवनस्य मूलाधारम्। पुरातनकालादेवात्र कृषेर्महिमा सम्यक् प्रतिष्ठतो बभूव। आर्याः कृषिपरायणा इति तेषां नाम्नैव सुव्यक्तम्। अर्यते कृषि इति अर्यः। स एव वैदिकसंस्कृतौ आर्य इति प्रोक्तः। अतः अस्माकं देशस्य कृषिः एव आत्मा। यतोहि आत्मैव जीवनसंचनारूपेण मन्यते। जीवनं च कृषेः उपरि आश्रिता कृषिणा एव भारतस्य सप्तदशप्रतिशत-मनुजानां जीवनयात्रा निर्बाधरूपेण चलति। अतएव अद्य कृषि-कृषकाणां च अत्यधिक महत्त्वं वर्तते। परन्तु अत्रत्यानां कृषकानां कृषिसमस्या अति कठिना। अस्मिन् देशे न कोऽपि उपयुक्तसिञ्चनव्यवस्था न च कोऽपि अतिवृष्टिराहत व्यवस्था दृश्येते। अतः कृषकाणां कृषिसमस्यां प्रति भारतसर्वकारस्य विशेषसहायतापेक्षिता। किरातार्जुनीयमहाकाव्ये अपि कृषिव्यवस्था विषये वर्णितमस्ति-

सुखेन लभ्या उधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति।।[1]

प्रजापालने तत्परः दुर्योधनः स्वराज्ये सर्वत्र अन्नवृद्धयर्थं कृत्रिम-नदी-प्रभृतीनां भूमिसेचनसाधनानां निर्माणं कारयति। एतेषां साधनानां साहायेन कुरुजनपदः वर्षाजलं विनाऽपि अत्यधिको अन्नसम्पन्न वर्तते। तस्य राज्ये ये



अङ्क ४६/१-२, वि.सं. २०७२, ISSN : 2229-5577

Scanned with CamScanner